**शिलाभेद** पु० शिलामपि भिनत्ति भिद–अण् । १पाषाण-भेदिटङ्के रत्नमा० २पाषाणभेदकाख्ये च ।

**शिलारम्भा** स्त्री शिलेव रम्भा । काष्ठकदल्यां राजनि० ।

**शिलावल्का** स्त्री शिलेव कठिनः वल्को यस्याः । (शिलाशाक्) इति प्रसिद्धे वृक्षभेदे शिलावल्कगण्यक्ष राजनि० । [त्रिका०

**शिलाव्याधि** पु० शिलाया व्याधिरिव । शैलेये गन्धद्रव्ये

**शिलासन** न० शिला आसनं यस्य । शैलेये गन्धद्रव्ये शब्दर० २शिलानिर्मिते आसने च ।

**शिलासार** न० शिलायाः सार इव । लौहे हेमच० ।

**शिलि** पु० शिल–कि । १भूर्जपत्रवृक्षे शब्दमा० । द्वाराधःस्थे २काष्ठे ( गोवराट ) स्त्री शब्दर० । ३भेक्यां ४छत्राक-पुष्पे ५लम्बगोर्धे च मेदि० स्त्री ङीप् ।

**शिलिन्द** पुंस्त्री० शिलिं ददाति दा–क पृषो० । स्वनामख्याते मत्स्यविशेषे "शिलिन्दः श्लेष्मलो बल्यो विपाके मधुरो गुरुः । आमवातकरो हृद्यो वातपित्तहरो मतः" राजवल्लभः । स्त्रियां ङीष् ।

**शिलीन्ध्र** न० शिलीं धरति धृ–क पृषो० मुम् । १कदली-पुष्पे २कवके च मेदि० ३शिलीन्ध्रप्रटायां शब्दर० । [हारा०

**शिलीन्ध्रक** न० शिलीन्ध्र इव इवार्थे–कन् । गोमयच्छत्राके

**शिलीपद** पु० शिली द्वाराधःस्थकाष्ठमिव पदमस्मात् । रोग-भेदे (गोद) शब्दर० पृषो० । श्लीपदमप्यत्र न० माधवनि० । तन्निदानादि माधवनि० उक्तं यथा

"पुराणोदकभूयिष्ठाः सर्वर्त्तुषु च शीतलाः । ये देशा-स्तेषु जायन्ते श्लीपदानि विशेषतः" । विशेषत इति वचनेनान्यत्रापि श्लीपदं भवतीति बोध्यते । अथ श्ली-पदस्य सामान्यलक्षणमाह "यः सज्वरो वङ्क्षणजो भृशार्त्तिः शोथो नृणां पादगतः क्रमेण । तत् श्लीपदं स्यात्करकर्णनेत्रशिश्नौष्ठनासास्वपि केचिदाहुः" । तच्चि-विधम् वातिकं पैत्तिकं श्लैष्मिकञ्चेति । तत्र तेषां क्रमेण लक्षणान्याह "वातजं कृष्णरूक्षं हि स्फुटितं तीव्र-वेदनम् । अनिमित्तरुजस्तस्य बहुशो ज्वर एव च । पित्तजं पीतसङ्काशं दाहज्वरयुतं भृशम् । श्लैष्मिकन्तु भवेत् स्निग्धं तथा पाण्डुरमस्थिरम् । त्रीण्यप्येतानि जानीयात् श्लीपदानि कफात् पुनः । गुरुत्वञ्च मह-त्त्वञ्च यस्मान्नास्ति विना कफात्" । अथासाध्यमाह "वल्मीकमिव सञ्जातं कण्टकैरुपचीयते । अब्दात्मकन्म-हत्तत्तु वर्जनीयं विशेषतः । यत् श्लैष्मिकाहारविहार-जातं जातं तथा भूरिकफस्य पुंसः । सास्रावमत्युन्नतसर्व-लिङ्गं सकण्डुकञ्चापि विवर्जनीयम्" अचिकित्स्यत्वादिति शेषः । [३युद्धे ४जडीभूते च शब्दर० ।

**शिलीमुख** पु० शिलीव मुखमस्य । १भ्रमरे २बाणे अमरः ।

**शिलोच्चय** पु० शिलानामुच्चयो यत्र । पर्वते अमरः ।

**शिलोञ्छ** पु०शिलेनोञ्छः उञ्छ–घञ् । उपात्तशस्यात् क्षेत्रात् शेषावचयने ।

**शिलोत्थ** न० शिलाया उत्तिष्ठति उद्–स्था–क । शैलेये गन्धद्रव्ये राजनि० । शिलोद्भवादयोऽप्यत्र ।

**शिल्प** न० शिल–पक् । चित्रकलादिकर्म्मणि अमरः । २स्रुचि मेदि० । तदारम्भमुहूर्तः ज्यो०चि० उक्तो यथा "मृदुध्रुवक्षिप्रचरे ज्ञे गुरौ वा स्वा१०लग्नगे । विधौ सज्जीववर्गस्थे शिल्पारम्भः प्रशस्यते" ।

**शिल्पकारिन्** त्रि० शिल्पं चित्रादिकलां करोति कृ–णिनि । चित्रादिकर्त्तरि ।

**शिल्पका** स्त्री शिल्पमिव कायति कै–क । तृणभेदे राजनि०

**शिल्पशाला** स्त्री ६त०। चित्रकरादीनां चित्रकरणगृहे अमरः

**शिल्पशास्त्र** न० शिल्पज्ञापनं शास्त्रम् । वास्तुविद्यादिज्ञा-पके शास्त्रे ।

**शिल्पिन्** त्रि० शिल्पं वेत्त्यधीते वा इनि । १चित्रादिकर्म-करे अमरः । २कोलदलौषधौ स्त्री मेदि० ङीप् ।

**शिव** न० शो–वन् पृषो० । १मङ्गले अमरः । २सुखे ३जले उणादि० । ४सैन्धवे सामुद्रे च ५लवणे ६श्वेतटङ्कणे च राजनि० । ७मङ्गलवति त्रि० ८वेदे ९देवे पु० अमरः । एवं ६मोक्षे १०कीलपके ११वालुके १२गुग्गुलौ १३वेदे १४पुण्डरीकवृक्षे १५कृष्णधुस्तूरे १६पारदे राजनि० । १७देवे शब्दर० १८दारुणि उणादि० १९विष्कुम्भादिषु मध्ये विंशतितमे योगे च पु० ज्यो०त० । "शिवमद्वैतं चतुर्थं मन्यन्ते" श्रुत्युक्ते २०अद्वैतब्रह्मणि न० ।

**शिवक** पु० शिव–इव इवार्थे कन् । १कीलके अमरः गवां गात्रकण्डूयनार्थं गोष्ठे निखाते २काष्ठे च भरतः ।

**शिवकाञ्ची** स्त्री ६त० । पुरीभेदे ।

**शिवघर्म्मज** शिवघर्मात् जायते जन–ड । मङ्गलग्रहे "पुरा दक्षविनाशाय कुपितस्य त्रिशूलिनः । अपतत् भीमवक्त्रस्य स्वेदबिन्दुर्ललाटजः" इत्यादिना वीरभद्रोत्-पत्तिमुक्त्वा तस्यैव मङ्गलग्रहरूपतामाह "शान्तिप्रदानात् सर्वेषां ग्रहाणां प्रथमो भव । प्रेक्षिष्यन्तो जनाः पूजां करिष्यन्ति मतं मम । अङ्गारक इति ख्यातिं गमिष्यसि धरात्मज !" मत्स्यपु० ६८अ० ।